एतेषां सवर्णाः। मातृष्वसा पितृष्वसा ज्येष्ठा स्वसा च। श्वशुर-पितृव्यमातुलर्त्विजां कनीयसां प्रत्युत्थानमेवाभिवादनम्। हीनवर्णानां गुरुपत्नीनां दूरादभिवादनं न पादोपसंस्पर्शनम्। गुरुपत्नीनां गात्रोत्सादनाञ्जनकेशसंयमनपादप्रक्षालनं न कुर्यात्" विष्णुः।"पादोपसंग्रहणं गुरुसमवायेऽन्वहम्। अभिगम्य तु विप्रोष्य मातापितृतद्बन्धूनां पूर्व्वजानां विद्यागुरूणां तत्तद्गुरूणाञ्च सन्निपाते परस्य। नाम प्रोच्याहमयमित्यभिवादोऽज्ञसमवाये स्त्रीपुंयोगेऽभिवादतोऽनियममेके न विप्रोष्य स्त्रीणाममातृपितृव्यभार्याभगिनीनां, नोपसंग्रहणं भ्रातृभार्याणां श्वश्र्वाश्च। ऋत्विक्श्वशुरपितृव्यमातुलानान्तु यवीयसां प्रत्युत्थानमनभिवाद्यास्तथान्यः पूर्व्वः पौरोऽशीतिकावरः शूद्रोऽप्यपत्यसमेनावरोऽप्यार्य्यः शूद्रेण नाम चास्य वर्जयेद्राज्ञश्चाजपः प्रेष्योभोभवन्निति वयस्यः समानेऽहनि जातोदशवर्षवृद्धः पौरः पञ्चभिः कलाभरः श्रोत्रियश्चारणस्त्रिभिः राजन्योवैश्यः कर्म्मविद्याहीनोदीक्षितस्य प्राक्क्रयात्। वित्तबन्धुकर्म्मजातिविद्यावयांसि मान्यानि परबलीयांसि श्रुतन्तु सर्वेभ्योगरीयस्तन्मूलत्वाद्धर्म्मस्य श्रुतेः"गौत०। अनभिवाद्याश्च "समिद्वार्य्युदकुम्भपुष्पान्नहस्तोनाभिवादयेद्यच्चाप्येवंयुक्तमिति" बौधायनः। "जपयज्ञजलस्थञ्च समित्पुष्पकुशानलान् दन्तकाष्ठञ्च भक्ष्यञ्च वहन्तं नाभिवादयेदिति" लघुहारीतः। अन्यत्रापि। "समित्पुष्पकुशाग्न्यम्बु—मृदन्नाक्षतपाणिकः। जपं होमञ्च कुर्वाणोनाभिवाद्यो द्विजो भवेदिति" च।

**अभिवाद्य** त्रि० अभिवादयितुमर्हः यत्। १ अभिवादनार्हे अभिवाद्याश्चाभिवादनशब्दे उक्ताः।"गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः"मनुः। ल्यप्। २ अभिप्रणम्येत्यर्थे अव्य०।

**अभिवान्य** त्रि० अभि+वन—संभक्तौ कर्म्मणि ण्यत्। संभजनीये। "अभिवान्यवत्साया: प्रजुहुयात्" श्रुतिः।

**अभिवासस्** अव्य० वासस उपरि अव्ययी०। परिहितवस्त्रस्योपरिभागे" स वा अभिवासः संनह्यति" शत०ब्रा०। "परिहितस्य वस्त्रस्य उपरि" भा०।

**अभिवाह्य** अभि++वह—ण्यत्। १अभितो वहनीये। भावे ण्यत्। २वहने न० "हव्यकव्याभिवाह्याय सर्वस्यास्य च गुप्तये" इति मनुः।

**अभिविधि** पु० अभितो विधिर्व्याप्तिः। १व्याप्तौ, मर्य्यादायां हि अवधिभूतं विहाय तत्तत्कार्य्यान्वयः अभिविधौ तु अवधिसहिते कार्य्यान्वय इति तस्य व्यापकता अतएवोक्तम् "मर्य्यादाभिविधिसन्देहे कार्य्यान्वितत्वादभिविधेर्ग्रहणमित्यभियुक्ताः। "आङ् मर्य्यादाभिविध्योः" पा०। "अभिविधौ भाव इनुण्" पा०"मर्य्यादायामभिविधौ क्रियायोगेषदर्थयोः। य आकारः स ङित् प्रोक्त" मु०बो०।

**अभिविमान** पु० परमात्मनि, "यस्त्वेनं प्रादेशमात्रमभिविमानं वैश्वानरमुपास्ते" इति छा०उ०। एतस्य निरुक्तिः शा० भाष्ये दर्शिता। प्रत्यगात्मतया सर्वैः प्राणिभिरभिविमीयत इति अभिविमानः। अभिगतो वाऽयं प्रत्यगात्मत्वात्, विमानश्च मानवियोगादित्यभिविमानः। अभिविमीते वा सर्वं जगत्कारणत्वादित्यभिविमानः" इति।

**अभिवृत्ति** स्त्री अभि+वृत्—क्तिन्। अभिगमने "स्वर्गस्य नो तस्याभिवृत्त्यै" ता०ब्रा०। "अभिवृत्त्यै अभिगमनाय" भा०

**अभिव्यक्त** त्रि०अभि+वि+अनुज—कर्मणि क्त। १अभिव्यक्तियुक्ते २सांख्यादिम—सिद्धाविर्भावयुक्ते"तत्र दैवमभिव्यक्तं पौरुषम् पौर्ब्वदेहिकम् पु०अभिव्यक्तमाविर्भूतं फलदानोन्मुखम्"रघु०

**अभिव्यक्ति** स्त्री अभि+वि—अनुज—क्तिन्। १ प्रकाशे सूक्ष्मरूपेण स्थितस्य("कारणात्मना स्थितस्य) कारणस्य २कार्य्यरूपेणाविर्भावे। साङ्ख्यपातञ्जलादिमते हि उत्पत्तेः प्राक् कार्य्यं सत् कारणव्यापारेण व्यज्यते यथोक्तम्। सांख्यसूत्रे। "त्रिविधविरोधापत्तेश्च"। "अथ सर्वं कार्य्यं त्रिविधं सर्ववादिसिद्धमतीतमनागतं वर्त्तमानमिति। तत्र यदि कार्य्यं सदा सन्न स्यते तदा त्रिविधत्वानुपपत्तिः। अतीतादिकाले घटाद्यभावेन घटादेरतीतादिधर्म्मकत्वानुपपत्तेः सदसतोः सम्बन्धानुपपत्तेः। किञ्च प्रतियोगित्वस्य प्रतियोगिरूपत्वे तद्दोषतादवस्थ्यात्। अभावमात्रस्वरूपत्वे पटाद्यभावो घटाद्यभावः स्यादभावत्वाविशेषात्। अभावेष्वपि स्वरूपतो विशेषाङ्गीकारे चाभावत्वस्य परिभाषामात्रत्वप्रसङ्गात्। अथ प्रतियोग्येवाभावविशेषक इति चेन्न असतः प्रतियोगिनः प्रागभावादिषु विशेषकत्वासम्भवादिति। तस्मान्नित्यस्यैव कार्य्यस्यातीतानागतवर्त्तमानावस्थाभेदा एव वक्तव्याः। घटोऽतीतो घटो वर्त्तमानो घटो भविष्यन्निति प्रत्ययानां तुल्यरूपतौचित्यात्। न त्वेकस्य भावविषयत्वमन्ययोस्त्वभावविषयत्वमिति। ते एवातीतानागतत्वे अवस्थे ध्वंसप्रागभावव्यवहारं जनयतस्तदतिरिक्ताभावद्वये प्रमाणाभावादिति एवमत्यन्ताभावान्योन्याभावावप्यधिकरणस्वरूपावेव। न चैवं प्रतियोगिसत्ताकालेऽप्यधिकरणस्वरूपानपायादत्यन्ताभावप्रत्ययप्रसङ्ग इति वाच्यम् परैरपि प्रतियोगिमति देशे तदत्यन्ताभावाङ्गीकारात्। प्रतियोगिसम्बन्धस्यातीतानागतावस्थयोरेव